सं०

४

८

नं. ८ क

रुद्री षड्वैदीय

४४ पत्र

5367

F. 44

Complete

नं० ५३६८-घ
रुद्री यजुर्वेदीय (वेद)
पत्राणि ४४ (चतुश्चत्वारिंशत्)
नं० ८ (सम्पूर्णम्)

[illegible]

[illegible]

[illegible]

[illegible]

ग. ॐश्रीगणेशायनमः॥ ॐम्॥ गणानान्त्वा॥ गणपतिꣳ
१ हवामहेप्रियाणान्त्वाप्रियपतिꣳहवामहेनिधीनान्त्वा
निधिपतिꣳहवामहेवसोमम॥ आहमजानिगर्भधमा
त्वमजासिगर्भधम्॥१॥ गायत्रीत्रिष्टुप्॥ गायत्रीत्रि
ष्टुब्जगत्यनुष्टुप्पङ्क्त्यासह॥ बृहत्युष्णिहाककुप्सूची
भिःशम्यन्तुत्वा॥२॥ द्विपदायाः॥ द्विपदायाश्चतुष्पदास्त्रि

पट्या याश्च षड्दुदाः ॥ द्विच्छन्दा याश्च सच्छन्दाः सूचीभिः श
म्यन्तु त्वा ॥३॥ सहस्तोमाः सहच्छन्दसः ॥ सहस्तोमाः स
हच्छन्दसऽआवृतः सहप्रमाऽऋषयः सप्तदैव्याः ॥ पू
र्वेषाम्पन्थामनुदृश्य धीराऽअन्वालेभिरे रथ्योन र
श्मीन् ॥४॥ यज्जाग्रतः ॥ यज्जाग्रतो दूरमुदैति दैवन्तदु सु
प्तस्य तथैवैति ॥ दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मे म

रु०
२

नःशिवसङ्कल्पमस्तु ॥ ५ ॥ येनकर्म्माणि ॥ येनकर्म्मा
ण्यपसोमनीषिणोयज्ञेकृण्वन्तिविदथेषुधीराः ॥ य
दपूर्व्वंयक्षमन्तःप्रजानान्तन्मेमनःशिवसङ्कल्प
मस्तु ॥ ६ ॥ यत्प्रज्ञानम् ॥ यत्प्रज्ञानमुतचेतोधृतिश्चय
ज्ज्योतिरन्तरमृतम्प्रजासु ॥ यस्मान्नऽऋतेकिञ्चनक
र्म्मक्रियतेतन्मेमनःशिवसङ्कल्पमस्तु ॥ ७ ॥ येनेद

म् ॥ येनेदम्भूतम्भुवनम्भविष्यत्परिगृहीतममृतेन

सर्व्वम् ॥ येन यज्ञस्तायते सप्तहोता तान्तन्मे मनः शिव

सङ्कल्पमस्तु ॥ ८ यस्मिन्नृचः ॥ यस्मिन्नृचः साम य

जूंषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः ॥ यस्मिं

श्चित्तं सर्व्वमोतम्प्रजानान्तन्मे मनः शिवसङ्कल्प

मस्तु ॥ ९ ॥ सुषारथिरश्वानिव ॥ सुषारथिरश्वानिव य

रु.
३

न्मनुष्यान्नेनीयतेभीशुभिर्व्वाजिनऽइव ॥ हृत्प्रति
ष्ठंयदजिरञ्जविष्ठन्तन्मेमनःशिवसङ्कल्पमस्तु
॥६॥ इतिरुद्रजाप्येप्रथमोध्यायः ॥१॥ सहस्रशीर्षापुरु
षः सहस्राक्षःसहस्रपात ॥ सभूमिंसर्वतस्पृत्वा
त्यतिष्ठद्दशाङ्गुलम् ॥१॥ पुरुषऽएव ॥ पुरुषऽएवेदंस
र्वंयद्भूतंयच्चभाव्यम् ॥ उतामृतत्वस्येशानोयदन्ने

नातिरोहति॥ ३ ॥ एतावानस्य॥ महिमातोज्यायांश्चपूरु
षः॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि॥ ३ ॥ त्रिपा
दूर्ध्वः॥ त्रिपादूर्ध्वउदैत्पुरुषःपादोस्येहाभवत्पुनः॥ ततोवि
ष्वङ्व्यक्रामत्साशनानशनेऽभि॥ ४ ॥ ततोविराट्॥
ततोविराडजायतविराजोऽधिपूरुषः॥ सजातोऽत्य
रिच्यतपश्चाद्भूमिमथोपुरः॥ ५ ॥ तस्माद्यज्ञात्॥ तस्मा

घ. द्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम् ॥ पशूंस्तांश्चक्रे
४ वायव्यानारण्याग्राम्याश्च ये ॥ ६ ॥ तस्माद्यज्ञात् ॥
५ तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे ॥ छ
न्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥
तस्मादश्वाः ॥ तस्मादश्वाऽअजायन्त ये के चोभ
यादतः ॥ गावो ह जज्ञिरे तस्मात् तस्माज्जाताऽअजा

वर्षः ॥ ८ ॥ तं यज्ञं ॥ तं यज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जा
तमग्रतः ॥ तेन देवा ऽ अयजन्त साध्या ऽ ऋषयश्च ये ॥
९ ॥ यत्पुरुषं ॥ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ॥
मुखङ्किमस्यासीत्किम्बाहू किमूरू पादा ऽ उच्येते ॥
१० ॥ ब्राह्मणोस्य ॥ ब्राह्मणोस्य मुखमासीद्बाहू रा
जन्यः कृतः ॥ ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो ऽ

ष॰ ५

ऽअजायत॥११॥चन्द्रमामनसः॥चन्द्रमामनसोजात
श्चक्षोःसूर्योऽअजायत॥श्रोत्राद्वायुश्चप्राणश्चमु
खादग्निरजायत॥१२॥नाभ्याऽआसीत॥नाभ्याऽआ
सीदन्तरिक्षंशीर्ष्णोद्यौःसमवर्त्तत॥पद्भ्यांभूमिर्दि
शःश्रोत्रात्तथालोकाँ॥ऽअकल्पयन॥१३॥यत्पु
रुषेण॥हविषादेवायज्ञमतन्वत॥वसन्तोस्यासीदा

ज्यङ्ग्रीष्मऽइध्मः शरद्धविः ॥१४॥ सप्तास्य ॥ सप्तास्यास
न्परिधयस्त्रिः सप्त समिधः कृताः ॥ देवा यद्यज्ञन्तन्वा
नाऽअबध्नन्पुरुषम्पशुम् ॥१५॥ यज्ञेन यज्ञम् ॥ यज्ञेन य
ज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् ॥ ते ह
नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥१६॥
अद्भ्यः सम्भृतः ॥ पृथिव्यै रसाच्च विश्वकर्म्मणः समव

घ॰ र्त्तताग्रे॥ तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्वमा
६ जानमग्रे॥ १७॥ वेदाहम्॥ वेदाहमेतम्पुरुषम्महान्तमा
दित्यवर्णन्तमसःपरस्तात्॥ तमेवविदित्वातिमृत्युमेति
नान्यःपन्थाविद्यतेयनाय॥ १८॥ प्रजापतिश्चरति॥ प्रजाप
तिश्चरतिगर्ब्भेऽन्तरजायमानोबहुधाविजायते॥ तस्य
योनिम्परिपश्यन्निधीरास्तस्मिन्हतस्थुर्भुवनानिवि

6

श्वा॥१९॥योदेवेभ्यः॥योदेवेभ्यआतपतियोदेवानाम्पुरो
हितः॥पूर्वोयोदेवेभ्योजातोनमोरुचायब्राह्मये॥२०॥
रुचम्ब्राह्मम्॥रुचम्ब्राह्मञ्जनयन्तोदेवाऽअग्रेतद
ब्रुवन्॥यस्त्वैवम्ब्राह्मणोविद्यात्तस्यदेवाऽअसन्वशे
२१॥श्रीश्च॥तेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्रा
णिरूपमश्विनौव्यात्तम्॥इष्णन्निषाणामुम्मऽइषा

ष· णासर्वलोकमम्मंऽइषाणा ॥ २४ ॥ इतिरुद्रजाप्येद्वितीयोध्या
यः ॥ ४ ॥ आशुःशिशानः ॥ आशुःशिशानोवृषभोनभीमो
घनाघनःक्षोभणश्चर्षणीनाम् ॥ सङ्क्रन्दनोनिमिषऽ
एकवीरःशतंसेनाऽअजयत्साकमिन्द्रः ॥ १ ॥ सङ्क्र
न्दनेनानिमिषेण ॥ जिष्णुनायुत्कारेणदुश्च्यवनेनधृ
ष्णुना ॥ तदिन्द्रेणजयततत्सहध्वंयुधोनरऽइषुहस्ते

तद्वृष्णा ॥ २ ॥ सऽइषुहस्तैः ॥ सऽइषुहस्तैः सनिषङ्गिभिर्वशी
संस्रष्टासयुधऽइन्द्रोगणेन ॥ संसृष्टजित्सोमपाबाहु
शर्ध्युग्रधन्वाप्रतिहिताभिरस्ता ॥ ३ ॥ बृहस्पतेपरि ॥ दीया
रथेनरक्षोहामित्राँ२ ॥ऽ अपबाधमानः ॥ प्रभञ्जन्त्सेनाः
प्रमृणोयुधाजयन्नस्माकमेध्यविता रथानाम् ॥ ४ ॥ बल
विज्ञायस्थविरः ॥ बलविज्ञायस्थविरःप्रवीरःसहस्वान्वा

ष· ८

जीसहमानऽउग्राः ॥ अभिवीरोऽअभिसत्वासहोजाजैत्रमि
न्द्ररथमातिष्ठगोवित् ॥५॥ गोत्रभिदङ्गोविदम् ॥ गोत्रभिद
ङ्गोविदंवज्रबाहुञ्जयन्तमज्मप्रमृणन्तमोजसा ॥ इम
ꣳसजाताऽअनुवीरयद्ध्वमिन्द्रꣳसखायोऽअनुसꣳर
भद्ध्वम् ॥६॥ अभिगोत्राणि ॥ अभिगोत्राणिसहसागाहमा
नोऽदयोवीरःशतमन्युरिन्द्रः ॥ दुश्च्यवनःपृतनाषाडयु

8

ध्योस्माकᳪंसेनाऽअवतुप्रयुत्सु॥७॥ इन्द्रऽआसाम्॥
इन्द्रऽआसान्नेताबृहस्पतिर्दक्षिणायज्ञःपुरऽएतुसो
मः॥ देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतो
यन्त्वग्रम्॥८॥ इन्द्रस्यवृष्णः॥ इन्द्रस्यवृष्णोवरुणस्य
राज्ञऽआदित्यानाम्मरुताᳪंशर्द्धऽउग्रम्॥ महामन
साम्भुवनच्यवानाङ्घोषोदेवानाञ्जयतामुदस्थात्॥९॥

घ॰ ६

उद्धर्षय॥ मघवन्नायुधान्युत्सत्वनाम्मामकानाम्मनांथं
सि॥ उद्वृत्रहन्वाजिनांवाजिनान्युद्रथानाञ्जयतांयन्तु
घोषाः॥११॥ अस्माकमिन्द्रः॥ अस्माकमिन्द्रःसमृतेषुध्व
जेष्वस्माकंयाऽइषवस्ताजयन्तु॥ अस्माकंवीराऽउ
त्तरेभवन्त्वस्माँ॥२॥ऽउदेवाऽअवताहवेषु॥१२॥ अमीषा
ञ्चित्तम॰ अमीषाञ्चित्तम्प्रतिलोभयन्तीगृहाणाङ्गान्यप्वे

9

प्वेपरेहि॥अभिप्रेहिनिर्दहहृत्सुशोकैरन्धेनामित्रास्त
मसासचन्ताम्॥११॥अवसृष्टापरा॥पतशरव्येब्रह्मसं
शिते॥गच्छामित्रान्प्रपद्यस्वमामीषांकंचनोच्छिषः॥१२
प्रेत॥प्रेताजयतानरऽइन्द्रोवःशर्म्मयच्छतु॥उग्रावःस
न्तुबाहवोनाधृष्यायथासथ॥१३॥असौयासेनामरु
तःपरेषामभ्यैतिनऽओजसास्पर्द्धमाना॥ताङ्गूहतत

ष॰ मुसमापब्रतेनयथामीऽअन्योऽअन्यन्नजानन् ॥ ९ ॥ यत्रबा
१॰ णाः ॥ सम्पतन्तिकुमाराविशिखाऽइव ॥ तन्नुऽइन्द्रोबृहस्प
10 तिरदितिः शर्म्मयच्छतुविश्वाहाशर्म्मयच्छतु ॥ १० ॥ मर्म्मा
णिते ॥ मर्म्मणितेवर्म्मणाच्छादयामिसोमस्त्वाराजामृतेना
नुवस्ताम् ॥ उरोर्वरीयोवरुणस्तेकृणोतुजयन्तन्त्वानुदे
वामदन्तु ॥ ११ ॥ इतिरुद्रजाप्येतृतीयोध्यायः ॥ ३ ॥ विभ्राड्बृ

हन्त॥ विभ्राड्बृहत्पिबतुसोम्यम्मध्वायुर्द्दधद्यज्ञपताव
विह्रुतम्॥ वातजूतोयोऽभिरक्षतित्मनाप्रजाःपुपो
षपुरुधाविराजति॥ ३॥ उदुत्यम्॥ उदुत्यञ्जातवेदसन्देवंव
हन्तिकेतवः॥ दृशेविश्वायसूर्य्यम्॥ ३॥ येनापावक॥ ये
नापावकचक्षसाभुरण्यन्तञ्जनाँ॥ ३॥ ऽनु॥ त्वंवरुणप
श्यसि॥ ३॥ दैव्यावध्वर्यू॥ दैव्यावध्वर्यूऽआगतँरथेनसू

ध॰
११

र्य्यृत्वचा ॥ मह्यायज्ञꣳ सममन्नाथे ॥ तम्प्रत्नथायंवेनश्चि

त्रन्देवानाम् ॥४॥ तम्प्रत्नथा ॥ पूर्वथाविश्वथेमथाज्येष्ठ

तातिम्बर्हिषदꣳ स्वर्विदम् ॥ प्रतीचीनंवृजनन्दोहसेधुनिमा

शुञ्जयन्तमनुयासुवर्द्धसे ॥५॥ अयंवेनः ॥ अयंवेनश्चोदय

त्पृश्निगर्भाज्योतिर्जरायूरजसोविमाने इममपाꣳ सङ्ग

मे सूर्यस्यशिशुन्नविप्रामतिभीरिहन्ति ॥६॥ चित्रन्देवाना

म चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यवरुणस्या
ग्नेः आप्राद्यावापृथिवीऽअन्तरिक्षंसूर्य्यऽआत्मा
जगतस्तस्थुषश्च ७ आनः आनऽइडाभिर्विदथेसु
शस्तिविश्वानरः सवितादेवऽएतु ॥ अपियथायुवानो
मत्सथानोविश्वञ्जगदभिपित्वेमनीषा ॥ ८ ॥ यदद्य
कच्चवृत्रहन्नुदगाऽअभिसूर्य्य ॥ सर्वन्तदिन्द्रतेवशे ॥

ष.
१२

॥९॥ तरणिर्विश्वदर्शतः तरणिर्विश्वदर्शतो ज्योति
ष्कृदसि सूर्य ॥ विश्वमाभासि रोचनम् ॥१०॥ तत्सूर्यस्य
देवत्वन्तन्महित्वम्मध्याकर्तोर्विततं सञ्जभार ॥
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सि
मस्मै ॥११॥ तन्मित्रस्य ॥ तन्मित्रस्य वरुणस्याभिच
क्षे सूर्यो रूपङ्कृणुते द्योरुपस्थे ॥ अनन्तमन्यद्रुश

12

दस्युपाजः क्रतुत्रमन्यह्वरितः सम्भरन्ति १२ बण्महा
न्॥ बण्महाँ असि सूर्य्य बडादित्य महाँ असि
महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ असि ॥
॥१३॥ बट् सूर्य्य ॥ बट् सूर्य्य श्रवसा महाँ असि सत्रा देव म
हाँ असि मह्ना देवानामसुर्य्यः पुरोहितो वि
भुज्योतिरदाभ्यम् ॥१४॥ आयन्त इव सूर्य्यम् ॥

ष- आयन्तऽइवसूर्य्यंविश्वेदिन्द्रस्यभक्षत ॥ वसूनिजा
१३ तेजनमानऽओजसाप्रतिभागन्नदीधिम ॥१५॥ अद्या
देवाः ॥ अद्यादेवाऽउदितासूर्य्यस्यनिरꣳहसः पिपृता
निरवद्यात् तन्नोमित्रोवरुणोमामहन्तामदितिः
सिन्धुःपृथिवीऽउतद्यौः ॥१६॥ आकृष्णेन आकृष्णे
नरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च ॥

13

हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्य

न्॥ १७॥ इतिरुद्रजाप्येचतुर्थोध्यायः॥ ४॥ नमस्ते॥ रुद्र

मन्यवउतोतइषवेनमः॥ बाहुभ्यामुततेनमः॥ १॥

याते॥ रुद्रशिवातनूरघोरापापकाशिनी॥ तयानस्त

न्वाशन्तमयागिरिशन्ताभिचाकशीहि॥ २॥ यामिषु

म्॥ यामिषुंगिरिशन्तहस्तेबिभर्ष्यस्तवे॥ शिवा

घ॰ १५

ङ्गिरित्रताङ्कुरुमाहिंसीःपुरुषञ्जगत॥३॥शिवेन
वचसा त्वागिरिशाच्छावदामसि॥यथानःसर्वमिज्ज
गदयक्ष्मंसुमनाऽअसत॥४॥अध्यवोचत।अध्य
वोचदधिवक्ताप्रथमोदैव्योभिषक॥अहींश्चसर्वा
ञ्जम्भयन्त्सर्वाश्चयातुधान्योधराचीःपरासुव॥५॥
असौयः॥असौयस्ताम्रोऽअरुणऽउतबभ्रुःसुम

15

ङ्गलाः॥ येचैनꣳरुद्राअभितोदिक्षुश्रिताःसहस्र
शोवैषाꣳहेडईमहे॥६॥ असौयः॥ असौयोवसर्पति
नीलग्रीवोविलोहितः॥ उतैनङ्गोपाअदृश्रन्नदृश्र
न्नुदहार्यःसदृष्टोमृडयातिनः॥७॥ नमोस्तु॥ नमो
स्तुनीलग्रीवायसहस्राक्षायमीढुषे॥ अथोयेऽ
अस्यसत्वानोहन्तेभ्योकरन्नमः॥८॥ प्रमुञ्च॥ प्रमु

घ. न्वुधन्वनस्त्वमुभयोरार्त्न्योर्ज्याम्॥ याश्च ते हस्तऽ
१५ इषवः परा ता भगवो वप॥९॥ विज्यन्धनुः॥ कपर्दिनो
विशल्यो बाणवाँ२॥ऽउत॥ अनेशन्नस्य या ऽइषवऽ
आभुरस्य निषङ्गधिः॥१०॥ या ते॥ हेतिर्म्मीढुष्टम हस्ते
बभूव ते धनुः॥ तयास्मान्विश्वतस्त्वमयक्ष्मया
परिभुज॥११॥ परि ते॥ परि ते धन्वनो हेतिरस्मान्वृ

15

णक्तुविश्वतः ॥ अथोयऽइषुधिस्तवारेऽअस्मन्निधेहि
तम् ॥१२॥ अवतत्यधनुः ॥ अवतत्यधनुष्ट्वꣳसहस्राक्ष
शतेषुधे ॥ निशीर्य्यशल्यानाम्मुखाशिवोनः सुमना
भव ॥१३॥ नमस्तऽ ॥ नमस्तऽआयुधायानाततायधृष्ण
वे ॥ उभाभ्यामुततेनमोबाहुभ्यान्तवधन्वने ॥१४॥ मानः ॥
मानोमहान्तमुतमानोऽअर्ब्भकम्मानऽउक्षन्तमुत

ष॰ १९

16

मानउक्षितम॥मानोवधीःपितरम्मोतमातरम्मानः

प्रियास्तन्वोरुद्ररीरिषः॥१५॥मानस्तोके॥तनयेमा

नआयुषिमानोगोषुमानोअश्वेषुरीरिषः॥मानो

वीरान्रुद्रभामिनोवधीर्हविष्मन्तःसदमित्वाहवा

महे॥१६॥नमोहिरण्यबाहवेसेनान्येदिशाञ्चपतये

नमोनमोवृक्षेभ्योहरिकेशेभ्यःपशूनाम्पतयेनमो

नमःशष्पिञ्जरायत्विषीमतेपथीनाम्पतयेनमो
नमोहरिकेशायोपवीतिनेपुष्टानाम्पतयेनमोनमो
बभ्लुशाय॥ ७॥ नमोबभ्लुशायव्याधिनेन्नानाम्पत
येनमोनमोभवस्यहेत्यैजगताम्पतयेनमोनमो
रुद्रायाततायिनेक्षेत्राणाम्पतयेनमोनमःसूता
याहन्त्यायवनानाम्पतयेनमोनमोरोहिताय॥ ८॥

ष॰ नमो रोहिताय स्थपतये वृक्षाणाम्पतये नमो नमो
भुवन्तये वारिवस्कृतायौषधीनाम्पतये नमो नमो म
न्त्रिणे वाणिजाय कक्षाणाम्पतये नमो नम उच्चै
र्घोषायाक्रन्दयते पत्तीनाम्पतये नमो नमः कृत्स्ना
यतया ॥ १९ ॥ नमः कृत्स्नायतया धावते सत्वनाम्पतये
नमो नमः सहमानाय निव्याधिनेऽव्याव्याधिनी

नाम्पतयेनमोनमोनिषङ्गिणेककुभायस्तेनानाम्पत
येनमोनमोनिचेरवेपरिचरायारण्यानाम्पतयेनमो
नमोवञ्चते॥२॥नमोवञ्चतेपरिवञ्चतेस्तायूनाम्पत
येनमोनमोनिषङ्गिणऽइषुधिमतेतस्कराणाम्पत
येनमोनमःसृकायिभ्योजिघांसद्भ्योमुष्णताम्प
तयेनमोनमोसिमद्भ्योनक्तञ्चरद्भ्योविकृन्ताना

नाम्पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानाम्पत
ये नमो नमो निचेरवे परिचरायारण्यानाम्पतये नमो
नमो वञ्चते ॥ २ ॥ नमो वञ्चते परिवञ्चते स्तायूनाम्पत
ये नमो नमो निषङ्गिणे इषुधिमते तस्कराणाम्पत
ये नमो नमः सृकायिभ्यो जिघांसद्भ्यो मुष्णताम्प
तये नमो नमो सिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्ताना

ष. म्पतयेनमः ॥२१॥ नमऽउष्णीषिणेगिरिचरायकुलु
१८ ञ्चानाम्पतयेनमोनमऽइषुमद्भ्योधन्वायिभ्यश्चवो
नमोनमऽआतन्वानेभ्यःप्रतिदधानेभ्यश्चवोनमो
18 नमऽआयच्छद्भ्योस्यद्भ्यश्चवोनमोनमोविसृजद्भ्यः ॥
॥२२॥ नमोविसृजद्भ्योविध्यद्भ्यश्चवोनमोनमः स्वप
द्भ्योजाग्रद्भ्यश्चवोनमोनमः शयानेभ्यऽआसीने

द्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः स
भाभ्यः ॥ २४ ॥ नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमो
ऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो नमः उगणाभ्यस्तृंथ
हतीभ्यश्च वो नमो नमो गणेभ्यः ॥ २५ ॥ नमो गणेभ्यो ग
णपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च
वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो न

ष· मोऽविरूपेभ्योविश्वरूपेभ्यश्चवोनमोनमःसेनाभ्यः॥
१९ ॥२५॥नमःसेनाभ्यःसेनानिभ्यश्चवोनमोनमोरथिभ्यो
19 ऽरथेभ्यश्चवोनमोनमःक्षत्तृभ्यःसङ्ग्रहीतृभ्यश्च
वोनमोनमोमहद्भ्योऽर्भकेभ्यश्चवोनमः॥२६॥न
मस्तक्षभ्यः॥नमस्तक्षभ्योरथकारेभ्यश्चवोनमो
नमः॥कुलालेभ्यःकर्मारेभ्यश्चवोनमोनमो

निषादेभ्यः पुञ्जिष्टेभ्यश्च वो नमो नमः श्वनिभ्यो मृग
युभ्यश्च वो नमः श्वभ्यः ॥ २७ ॥ नमः श्वभ्यः श्वपतिभ्य
श्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुप
तये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः कप
र्द्दिने ॥ २८ ॥ नमः कपर्द्दिने च व्युप्तकेशाय च नमः सह
स्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिवि

ष॰
२॰

ष्टायचनमोमीढुष्टमायचेषुमतेचनमोह्रस्वाय॥१९
नमोह्रस्वायचवामनायचनमोबृहतेचवर्षीयसेच
नमोवृद्धायचसवृध्वनेचनमोऽग्रियायचप्रथमायचन
मऽआशवे॥१॥नमऽआशवेचाजिरायचनमः शी
घ्र्यायचशीभ्यायचनमऽऊर्म्यायचावस्वन्या
यचनमोनादेयायचद्वीप्यायच॥३॥नमोज्येष्ठाय

२०

चकनिष्ठायचनमः पूर्वजायचापरजायचनमोम
ध्यमायचापगल्भायचनमोजघन्यायचबुध्न्याय
चनमः सोभ्याय॥३२॥नमः सोभ्यायचप्रतिसर्य्या
यचनमोयाम्म्यायचक्षेम्म्यायचनमः श्लोक्याय
चावसान्यायचनमः उर्वर्य्यायचखल्यायचनमो
वन्याय॥३३॥नमोवन्यायचकक्ष्यायचनमः श्रवा

श्रु॰ यश्च प्रतिश्रवाय च नमऽआशुषेणाय चाशुरथाय च
२१ नमः शूराय चावभेदिने च नमो बिल्मिने ॥३४॥ नमो
21 बिल्मिने च कवचिने च नमो वर्म्मिणे च वरूथिने च
नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाह
नन्याय च नमो धृष्णवे ॥३५॥ नमो धृष्णवे च प्रमृशाय
च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चा

युधिनेचनमःस्वायुधायचसुधन्वनेच ॥३५॥ नमःस्रुत्या

यचपथ्यायचनमःकाट्यायचनीप्यायचनमःकुल्या

यचसरस्यायचनमोनादेयायचवैशन्तायचनमःकूप्या

य ॥३६॥ नमःकूप्यायचावट्यायचनमोवीध्र्यायचात

प्यायचनमोमेघ्यायचविद्युत्यायच नमोवर्ष्याय

चावर्ष्यायचनमोवात्याय ॥३७॥ नमोवात्यायचरेष्म्या

घ·
२२

22

यचनमोबास्तव्व्यायचबास्तुपायचनमःसोमायच
रुद्रायचनमस्ताम्म्रायचारुणायचनमःशङ्गवे॥३९॥
नमःशङ्गवेचपशुपतयेचनमउग्ग्रायचभीमायचन
मोग्ग्रेवधायचदूरेवधायचनमोहन्त्रेचहनीयसेचनमो
वृक्षेभ्योहरिकेशेभ्योनमस्ताराय॥४०॥नमःशम्भवाय॥
चमयोभवायचनमःशङ्करायचमयस्करायचनमः

शिवायचशिवतरायच॥४१॥नमःपार्य्यायचावार्य्याय
चनमःप्रतरणायचोत्तरणायचनमस्तीर्थ्यायचकू
ल्यायचनमःशष्प्यायचफेन्यायचनमःसिकत्याय॥
॥४२॥नमःसिकत्यायचप्रवाह्यायचनमःकिंशि
लायचक्षयणायचनमःकपर्द्दिनेचपुलस्तयेचनमः
इरिण्यायचप्रपथ्यायचनमोव्रज्याय॥४३॥नमोव्र

घ॰ ष्ठ्यायचगृह्यायचनमस्तल्प्यायचगेह्यायचन
२३ मोहृदय्यायचनिवेष्प्यायचनमःकाट्यायचगह्व
रेष्ठायचनमःशुष्क्याय ॥५८॥ नमःशुष्क्यायचहरि
23 त्यायचनमःपांसव्यायचरजस्यायचनमोलोप्या
यचोलप्यायचनमऽऊर्व्यायचसूर्म्यायचनमःपर्ण्या
य ॥५९॥ नमःपर्ण्यायचपर्णशदायचनमऽउद्गुरमाणा

यच्चाभिघ्नते च नमः ऽआखिदते च प्रखिदते च नमः ऽइषु
कृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवा
नां हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्के
भ्यो नमः ऽआनिर्हतेभ्यः ॥४६॥ द्रापेऽअन्धसः ॥ द्रापेऽअ
न्धसस्पते दरिद्र नीललोहित ॥ आसां प्रजानामेषाम्प
शूनाम्मा भेर्म्मा रो मो च नः किञ्चनाममत् ॥४७॥

ष· इमारुद्राय॥तवसेकपर्दिनेक्षयद्वीरायप्रभरामहेम
२५ तीः॥यथाशमसद्द्विपदेचतुष्पदे॥विश्वम्पुष्टङ्ग्रामे
अस्मिन्ननातुरम्॥४७॥याते॥रुद्रशिवातनूः शिवावि
24 श्वाहाभेषजी॥शिवारुद्रस्यभेषजीतयानोमृडजीव
से॥४८॥परिनः॥परिणोरुद्रस्यहेतिर्वृणक्तुपरित्वेषस्य
दुर्मतिरघायोः॥अवस्थिरामघवद्भ्यस्तनुष्वमी

हृस्तोकायतनयायमृड ॥५०॥ मीढुष्टमशिवतम ॥
शिवोनःसुमनाभव॥ परमेवृक्षऽआयुधन्निधायकृ
त्तिंवसानऽआचरपिनाकम्बिभ्रदागहि॥५१॥ विकिरि
द्रविलोहित॥ विकिरिद्रविलोहितनमस्तेऽअस्तुभ
गवः॥ यास्तेसहस्रंहेतयोन्यमस्मन्निवपन्तुताः
॥५२॥ सहस्राणिसहस्रशः॥ सहस्राणिसहस्रशोबा

ष द्ध्वासहस्रवहेतयः॥ तासामीशानोभगवःपराचीनामुखा
२५ कृधि॥५१॥ असङ्ख्याता सहस्राणि॥ असङ्ख्यातासह
25 स्राणियेरुद्राऽअधिभूम्याम्॥ तेषाँसहस्रयोजने
वधन्वानितन्मसि॥५४॥ अस्मिन्महति॥ अस्मिन्म
हत्यर्णवेन्तरिक्षेभवाऽअधि॥ तेषाँसहस्रयोजने
वधन्वानितन्मसि॥५५॥ नीलग्रीवाःशितिकण्ठाः

नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्राऽउपश्रिताः
तेषाꣳ सहस्रयोजनेव धन्वानितन्मसि ॥ ५५ ॥ नील
ग्रीवाः शितिकण्ठाः ॥ शर्वाऽअधः क्षमाचराः ॥ तेषा
ꣳ सहस्रयोजनेव धन्वानितन्मसि ॥ ५६ ॥ येवृक्षेषु
शष्पिञ्जरानीलग्रीवाविलोहिताः ॥ तेषाꣳ सहस्र
योजनेव धन्वानितन्मसि ॥ ५७ ॥ येभूतानामधिपतयो

घं
२६

विशिखासःकपर्दिनः।।तेषाᳪंसहस्रयोजनेवध
न्वानितन्मसि।।५९।।येपथां।।येपथाम्पथिरक्षयऽऐ
लबृदाऽआयुर्युधः।।तेषाᳪंसहस्रयोजनेवधन्वानि
तन्मसि।।६०।।येतीर्थानि।।प्रचरन्तिसृकाहस्तानिषङ्गि
णः।।तेषाᳪंसहस्रयोजनेवधन्वानितन्मसि।।६१।।
येन्नेषु।।विविध्यन्तिपात्रेषुपिबतोजनान्।।तेषाᳪंस

26

हस्रयोजनेवधन्वानितन्मसि ॥६२॥ यऽएतावन्तः ॥
यऽएतावन्तश्चभूयाꣳसश्चदिशोरुद्रावितस्थिरे ॥
तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥६३॥ नमो
स्तुरुद्रेभ्योयेदिवियेषांवर्षमिषवः ॥ तेभ्योदशप्राची
र्दशदक्षिणादशप्रतीचीर्दशोदीचीर्दशोर्ध्वाः ॥ तेभ्योनमो
ऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वे

ष॰ २७

ष्टितमेषाञ्जम्भेदध्मः॥४८॥नमोस्तुरुद्रेभ्यो
येन्तरिक्षेयेषांवातइषवः॥तेभ्योदशप्राचीर्दशद
क्षिणादशप्रतीचीर्दशोदीचीर्दशोर्ध्वाः॥तेभ्योनमो
ऽस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनो
द्वेष्टितमेषाञ्जम्भेदध्मः॥४९॥नमोस्तुरुद्रेभ्योयेपृथि
व्यांयेषामन्नमिषवः॥तेभ्योदशप्राचीर्दशदक्षिणा

27

दशप्रतीचीर्द्दशोदीचीर्द्दशोर्द्ध्वाः॥ तेभ्योनमोऽस्त्वन्तुते
नोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भे
दध्मः॥ ६६॥ इतिरुद्रजाप्येपंचमोध्यायः ५ नमस्ते
षोडशकण्डिका॥ १॥ एषते॥ रुद्रभागःसहस्वस्रा
म्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागऽआखुस्तेप
शुः॥ २॥ अवरुद्रम॥ अवरुद्रमदीमह्यवदेवन्त्र्यम्बक

ष॰ २८ म॥ यद्ध्यानोवस्यसंस्काराद्ध्यानाः श्रेयसंस्काराद्ध्

यानोद्ध्यवसाययातः॥ ४॥ नमस्ते॥ रुद्र मन्यव ऽउतोत

ऽइषवे नमः॥ बाहुभ्यामुत ते नमः॥ १॥ याते॥ रुद्र शि

वा तनूरघोरापापकाशिनी॥ तयानस्तन्वा शन्तम

या गिरिशन्ताभिचाकशीहि॥ २॥ नतं॥ नतं विदाय य

ऽस्माज्जातान्यद्युष्माकमन्तरं बभूव॥ नीहारे

णा पृष्टाहूताजलन्धानाचास्तृत्पऽउक्कृषणा संश्वरन्ति ॥२१
विश्वकर्म्मा हि ॥ विश्वकर्म्मा ह्यजनिष्टदेवऽआदि
द्गन्धर्वोऽअभवद्द्वितीयः ॥ तृतीयः पिता जनितौषधीना
मपां गर्भं व्यदधात्पुरुत्रा ॥२२॥ मीढुष्टम शिवतम ॥ शि
वो नः सुमना भव परमे वृक्षऽआयुधन्निधाय कृत्तिं वसा
नऽआचर पिनाकम्बिभ्रदागहि ॥२३॥ विकिरिद्र वि

ष॰
२९

लोहितनमस्तेऽअस्तुभगवः ॥ यास्तेसहस्रंहे
तयोऽन्यमस्मन्निवपन्तुताः २४ ॥ सहस्राणिसहस्र
शोबाह्वोस्तवहेतयः ॥ तासामीशानोभगवः पराची
नामुखाकृधि ॥ २५ ॥ असंङ्ख्यातासहस्राणियेरुद्राऽ
अधिभूम्याम ॥ तेषांसहस्रयोजनेवधन्वानितन
न्मसि ॥ २६ ॥ ब्रूयथंसोम ॥ ब्रूतेतवमनस्तनूषुबि

29

ब्रूतः॥प्रजावन्तःसचेमहि॥२७॥एषतेरुद्रभागःसह
स्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागऽआखु
स्तेपशुः॥२८॥अवरुद्रमदीमह्यवदेवन्त्र्यम्बकम्
यथानोवस्यसस्करद्यथानःश्रेयसस्करद्यथानो
व्यवसाययात्॥२९॥भेषजमसि॥भेषजङ्गवेश्वायपु
रुषायभेषजम्॥सुखम्मेषायमेष्यै॥३०॥त्र्यम्बकं

घ. य्यजामहेसुगन्धिम्पतिवेदनम् ॥ उर्व्वारुकमिवबन्ध
रु. नादितोमुक्षीयमामुतः ॥ ३१ ॥ एतत्तेरुद्रावसन्तेनपरो
मूजवतोतीहि ॥ अवततधन्वापिनाकावसः कृत्तिवासा
30 ऽअहिंसन्नः शिवोतीहि ॥ ३२ ॥ त्र्यायुषञ्जमदग्नेः ॥ क
श्यपस्यत्र्यायुषम् ॥ यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्या
युषम् ॥ ३३ ॥ शिवोनाम ॥ शिवोनामासिस्वधितिस्तेपि

तानमस्त्वेश्मस्त्रुमामाहिंसीः॥ निर्वर्त्तयाम्यायुषे
त्वान्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वायसु
वीर्याय॥ २४॥ उग्रश्च॥ भीमश्चध्वान्तश्चधुनिश्च॥ सासह्वां
श्चाभियुग्वाचविक्षिपः स्वाहा॥ २५॥ अग्निंहृदयेन॥
मग्निंहृदयेनाशनिंहृदयाग्रेणपशुपतिंकृत्स्न
हृदयेनभवंयक्ना॥ शर्वम्मतस्नाभ्यामीशानम्मन्यु

घ० नो महादेवमन्तःपर्श्व्येनोग्रन्देवं वनिष्ठुना वसिष्ठ
३१ हनुः शिङ्गीनि कोश्याभ्याम् ॥ ३८॥ उग्रँल्लोहितेन ॥
मित्रँ सौव्रत्येन रुद्रन्दौर्व्रत्येनेन्द्रम्प्रक्रीडेन मरुतो
बलेन साध्यान्प्रमुदा ॥ भवस्य कण्ठ्यँ रुद्रस्यान्तःपा
र्श्व्यम्महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीत
त् ॥ ३९॥ स्वस्ति नः स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववे
दाः

स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः ॥ स्वस्तिनोबृहस्पति
र्दधातु ॥ ३० ॥ पयः पृथिव्याम् ॥ पयः पृथिव्याम्पयऽओष
धीषुपयोदिव्यन्तरिक्षेपयोधाः ॥ पयस्वतीः प्रदिशः स
न्तुमह्यम् ॥ ३४ ॥ विष्णोरराटम् ॥ विष्णोरराटमसिविष्णोः
श्नप्त्रेस्थोविष्णोः स्यूरसिविष्णोर्ध्रुवोसि ॥ वैष्णवमसि
विष्णवेत्वा ॥ ८० ॥ अग्निर्देवता ॥ अग्निर्देवतावातोदेवता

ष॰
३२

सूर्य्योदेवताचन्द्रमादेवतावसवोदेवतारुद्रादेवतादि
त्यादेवतामरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्देव
तेन्द्रोदेवतावरुणोदेवता॥४॥द्यौःशान्तिः॥द्यौःशान्तिर
न्तरिक्षंशान्तिःपृथिवीशान्तिरापःशान्तिरोषधयः
शान्तिः॥वनस्पतयःशान्तिर्विश्वेदेवाःशान्तिर्ब्रह्म
शान्तिःसर्वंशान्तिःशान्तिरेवशान्तिःसामाशान्ति

32

रोधि ॥ ४२ ॥ इति रुद्रजाप्ये षष्ठोध्यायः ॥ ६ ॥ वाजश्च मे प्रस
वश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे
स्वरश्च मे श्लोकश्च मे श्रवश्च मे श्रुतिश्च मे ज्योतिश्च मे स्व
श्च मे यज्ञेन कल्पन्ताम् ॥ १ ॥ प्राणश्च मे पानश्च मे व्यान
श्च मे सुश्च मे चित्तञ्च म आधीतञ्च मे वाक्च मे मन
श्च मे चक्षुश्च मे श्रोत्रञ्च मे दक्षश्च मे बलञ्च मे यज्ञे

घ॰ नेकल्पन्ताम्॥४॥सत्यञ्च॥मेश्रद्धाचमेजगच्चमेधनञ्च
३३ मेविश्वञ्चमेमहश्चमेक्रीडाचमेमोदश्चमेजातञ्च
मेजनिष्यमाणञ्चमेसूक्तञ्चमेसुकृतञ्चमेयज्ञे
नकल्पन्ताम्॥५॥ऋतञ्च॥मेमृतञ्चमेयक्ष्मञ्चमे
नामयच्चमेजीवातुश्चमेदीर्घायुत्वञ्चमेनमित्रञ्च
मेभयञ्चमेसुखञ्चमेशयनञ्चमेसूषाचमेसुदि

तञ्च मे यज्ञेन कल्पन्ताम् ॥ ४ ॥ यन्ता च मे धर्त्ता च मे क्षे
मश्च मे धृतिश्च मे विश्वञ्च मे महश्च मे संविच्च मे ज्ञात्रं
च मे सूश्च मे प्रसूश्च मे सीरञ्च मे लयश्च मे यज्ञेन क
ल्पन्ताम् ॥ ५ ॥ शञ्च मे मयश्च मे प्रियञ्च मे ऽनुकाम
श्च मे कामश्च मे सौमनसश्च मे भगश्च मे द्रविणञ्च मे
भद्रञ्च मे श्रेयश्च मे वसीयश्च मे यशश्च मे यज्ञेन क

ष· ल्पन्ताम् ॥ ६ ॥ ऊर्क्च मे सूनृता च मे पयश्च मे रस
३८ श्च मे घृतञ्च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषि
श्च मे वृष्टिश्च मे जैत्रञ्च म औद्भिद्यञ्च मे यज्ञेन कल्प
न्ताम् ॥ ७ ॥ रयिश्च मे रायश्च मे पुष्टञ्च मे पुष्टिश्च मे
विभु च मे प्रभु च मे पूर्णञ्च मे पूर्णतरञ्च मे कुयव
ञ्च मे क्षितञ्च मे ऽन्नञ्च मे ऽक्षुच्च मे यज्ञेन कल्पन्ताम् ॥

34

१० | वित्तञ्च | मे वेद्यञ्च मे भूतञ्च मे भविष्यच्च मे सु
गञ्च मे सुपथ्यञ्च म ऽऋद्धञ्च म ऽऋद्धिश्च मे क्लृप्त
ञ्च मे क्लृप्तिश्च मे सुमतिश्च मे यज्ञेन कल्पन्ताम ॥११॥
व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च
मे खल्वाश्च मे प्रियङ्गवश्च मे ऽणवश्च मे श्यामाका
श्च मे नीवाराश्च मे गोधूमाश्च मे मसूराश्च मे यज्ञेन क

घ॰ ल्पन्तां ॥१२॥ अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्व
३५ ताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यञ्च मे
यश्च मे श्यामञ्च मे लोहञ्च मे सीसञ्च मे त्रपु च मे
35 यज्ञेन कल्पन्ताम् ॥१३॥ अग्निश्च मऽआपश्च मे वीरु
धश्च मऽओषधयश्च मे कृष्टपच्याश्च मे कृष्टपच्याश्च
मे ग्राम्याश्च मे पशवऽआरण्याश्च मे वित्तञ्च मे वि

त्तिश्च मे भूतञ्च मे भूतिश्च मे यज्ञेन कल्पन्ताम् ॥१४॥
वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म
ऽएमश्च म ऽइत्या च मे गतिश्च मे यज्ञेन कल्पन्ताम् ॥१५॥
अग्निश्च म ऽइन्द्रश्च मे सोमश्च म ऽइन्द्रश्च मे सविता च
म ऽइन्द्रश्च मे सरस्वती च म ऽइन्द्रश्च मे पूषा च म ऽइन्द्रश्च
मे बृहस्पतिश्च म ऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥१६॥

घः
३६

36

मित्रश्च म ऽइन्द्रश्च मे वरुणश्च म ऽइन्द्रश्च मे धाता च म
ऽइन्द्रश्च मे त्वष्टा च म ऽइन्द्रश्च मे मरुतश्च म ऽइन्द्रश्च मे
विश्वे च मे देवा ऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥ १७ ॥ पृ
थिवी च म ऽइन्द्रश्च मेऽन्तरिक्षं च म ऽइन्द्रश्च मे द्यौश्च
म ऽइन्द्रश्च मे समाश्च म ऽइन्द्रश्च मे नक्षत्राणि च म ऽइन्द्र
श्च मे दिशश्च म ऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥ १८ ॥

अंशुश्च मे रश्मिश्च मेदाभ्यश्च मेधिपतिश्च म उ
पांशुश्च मेन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरु
णश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च
मे मन्थी च मे यज्ञेन कल्पन्ताम् ॥१९॥ आग्रयणश्च
मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऐन्द्राग्न
श्च मे महावैश्वदेवश्च मे मरुत्वतीयाश्चश्च मे निष्के

घ॰ ३८

वल्ल्यश्च मे सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च
मे हारियोजनश्च मे यज्ञेन कल्पन्ताम् ॥ २१ ॥ स्रुचश्च
मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ग्रा
वाणश्च मे ऽधिषवणे च मे पूतभृच्च म आधवनीयश्च
मे वेदिश्च मे बर्हिश्च मे ऽवभृथश्च मे स्वगाकारश्च मे य
ज्ञेन कल्पन्ताम् ॥ २२ ॥ अग्निश्च मे घर्मश्च मे ऽर्कश्च

37

मेसूर्य्यश्चमेप्राणाश्चमेपानश्चमेयश्चमेपृथिवीचमेदिति
श्चमेदितिश्चमेद्यौश्चमेङ्गुलयःशक्करयोदिशश्चमेय
ज्ञेनकल्पन्ताम्॥२२॥व्रतञ्च॥मऽऋतवश्चमेतपश्च
मेसंवत्सरश्चमेहोरात्रेऽऊर्वष्ठीवेबृहद्रथन्तरेचमेय
ज्ञेनकल्पन्ताम्॥२३॥एकाच॥मेतिस्रश्चमेतिस्रश्च
मेपञ्चचमेपञ्चचमेसप्तचमेसप्तचमेनवचमे

ष॰
३८

38

नवचमऽएकादशचमऽएकादशचमेत्रयोदशचमेत्रयो
दशचमेपञ्चदशचमेपञ्चदशचमेसप्तदशचमेसप्तद
शचमेनवदशचमेनवदशचमऽएकविंशतिश्चमऽ
एकविंशतिश्चमेत्रयोविंशतिश्चमेत्रयोविंश
तिश्चमेपञ्चविंशतिश्चमेपञ्चविंशतिश्चमेस
प्तविंशतिश्चमेसप्तविंशतिश्चमेनवविंश

तिश्च मे नवविꣳशतिश्च मऽएकत्रिꣳशच्च मऽएकत्रिꣳ
शच्च मे त्रयस्त्रिꣳशच्च मे यज्ञेन कल्पन्ताम् ॥२४॥ चतस्रश्च
मेष्टौ च मेष्टौ च मे द्वादश च मे द्वादश च मे षोडश च मे षो
डश च मे विꣳशतिश्च मे विꣳशतिश्च मे चतुर्विꣳशा
तिश्च मे चतुर्विꣳशतिश्च मेष्टाविꣳशतिश्च मेष्टावि
ꣳशतिश्च मे द्वात्रिꣳशच्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳ

घ॰
३९

शाश्च मे षट्त्रिꣳशाश्च मे चत्वारिꣳशाश्च मे चत्वारिꣳशाश्च मे
चतश्चत्वारिꣳशाश्च मे चतश्चत्वारिꣳशाश्च मे ष्टाचत्वारि
ꣳशाश्च मे यज्ञेन कल्पन्ताम् ॥ २५ ॥ त्र्यविश्च ॥ मे त्र्यवी च मे
दित्यवाहु मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रि
वत्सश्च मे त्रिवत्सा च मे तुर्यवाहु मे तुर्यौही च मे यज्ञेन
कल्पन्ताम् ॥ २६ ॥ पष्ठवाहु ॥ मे पष्ठौही च म उक्षा च मे व

39

शाचमऋषभश्चमेवेहच्चमेनड्वांश्चमेधेनुश्चमेयज्ञेनक
ल्पन्ताम् २८ वाजायस्वाहा प्रसवायस्वाहापिजायस्वा
हाक्रतवेस्वाहावसवेस्वाहाहर्पतयेस्वाहाह्नेमुग्धायस्वा
हामुग्धायवैनꣳशिनायस्वाहाविनꣳशिनआन्त्याय
नायस्वाहान्त्यायभौवनायस्वाहाभुवनस्यपतयेस्वाहाधि
पतयेस्वाहाप्रजापतयेस्वाहा इयन्तेराण्मित्राययन्तासि

घ॰ ५॰

यमन्तः ऊर्ज्जेत्वावृष्ट्यैत्वाप्रजानान्त्वाधिपत्याय ॥२८॥
आयुर्य्यज्ञेन कल्पताम्प्राणोयज्ञेनकल्पताञ्चक्षु
र्य्यज्ञेनकल्पताꣳश्रोत्रय्यज्ञेनकल्पतांवाग्यज्ञेन
कल्पताम्मनोयज्ञेनकल्पतामात्मायज्ञेनकल्पता
म्ब्रह्मायज्ञेनकल्पताञ्ज्योतिर्य्यज्ञेनकल्पताꣳस्व
र्य्यज्ञेनकल्पताम्पृष्ठंय्यज्ञेनकल्पतांयज्ञोयज्ञेनक

40

ल्पन्ताम् । स्तोमश्च यजुश्च ऋक्च साम च बृहच्च रथ
न्तरञ्च । स्वर्देवा ऽअगन्मामृता ऽअभूम प्रजापतेः प्रजा
ऽअभूम वेट् स्वाहा ॥ २९ ॥ ११ ॥ इति रुद्रजाप्ये सप्तमोऽध्यायः ॥ ८
ऋचं वाचं म । ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम
प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये । वागोजः सहौजो म
यि प्राणापानौ ॥ १ ॥ यन्मे । छिद्रं चक्षुषो हृदयस्य मन

घ॰
४१

सोवातिन्द्रस्सम्बृहस्पतिर्म्मेनदद्यात्॥ शन्नोभवतु
भुवनस्ययस्पतिः॥ ॐ भूर्भुवः॥ भूर्भुवः स्वः॥ तत्सवि
तुर्व्वरेण्यम्भर्गोदेवस्यधीमहि॥ धियोयोनः प्रचोदयात्॥ १
कयानः॥ कयानश्चित्रऽआभुवदूती सदावृधः सखा॥ क
याशचिष्ठयावृता॥ ४ कस्त्वा॥ सत्योमदानाम्मंहिष्ठो
मत्सदन्धसः॥ दृढाचिदारुजेवसु॥ ५ अभीषुणः॥ अभी

41

भगाः सखीनामविताजरितॄणाम् ॥ शतम्भवास्यूतिभिः ॥ ६
कयात्वम् ॥ कयात्वन्नऽऊत्याभिप्रमन्दसे वृषन् ॥ कयास्तो
तृभ्यऽआभर ॥ ७ इन्द्रो विश्वस्य राजति ॥ शन्नोऽअस्तु द्वि
पदे शञ्चतुष्पदे ॥ ८ शन्नः ॥ शन्नो मित्रः शंवरुणः शन्नो
भवत्वर्य्यमा ॥ शन्नऽइन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्र
मः ॥ ९ ॥ शन्नो वातः ॥ पवताँ शन्नस्तपतु सूर्य्यः ॥ शन्नः

घ॰ कनिक्रदद्देवः पर्जन्यो ऽअभिवर्षतु ॥ ९ ॥ अहानि शम् ॥ अ
४२ हानि शम्भवन्तु नः शꣳ रात्रीः प्रति धीयताम् ॥ शन्न ऽइ
न्द्राग्नी भवतामवोभिः शन्न ऽइन्द्रावरुणा रातहव्या ॥ श
न्न ऽइन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शं
योः ॥ ११ ॥ शन्नो देवीः ॥ शन्नो देवीरभिष्टय ऽआपो भवन्तु
पीतये ॥ शं योरभि स्रवन्तु नः ॥ १२ ॥ स्योना पृथिवि ॥ नो भवा

42

नृक्षरा निवेशनी ॥ यच्छा नः शर्म्म सप्रथाः ॥ १३ ॥ आपो हि
ष्ठा मयोभुवस्तान ऊर्जे दधातन ॥ महे रणाय चक्षसे ॥ १४ ॥
यो वः ॥ शिवतमो रसस्तस्य भाजयतेह नः ॥ उशतीरिव मात
रः ॥ १५ ॥ तस्मा ऽअरम ॥ तस्मा ऽअरं गमाम वो यस्य क्षयाय
जिन्वथ आपो जनयथा च नः ॥ १६ ॥ द्यौः शान्तिः ॥ द्यौः शान्ति
रन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः

ष· ८३ शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म
शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ॥ ८
43 दृतेदृंह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समी
क्षन्ताम् ॥ मित्रस्याहञ्चक्षुषा सर्वाणि भूतानि समीक्षे ॥
मित्रस्य चक्षुषा समीक्षामहे ॥ १८ दृतेदृंह मा ॥ ज्योक्ते
सन्दृशि जीव्यासं ज्योक्ते सन्दृशि जीव्यासम् ॥ १९ ॥

नमस्ते हरिकेशाय विषे नमस्तेऽस्त्वर्चिषे ॥ स्वस्थांस्तेऽस्र
स्मस्मेपन्नहेतयः पावकोऽस्मभ्यं शिवो भव ॥ २० ॥ नमस्
ते ॥ ऽस्तु विद्युते नमस्ते स्तनयित्नवे ॥ नमस्ते भगवन्न
स्तु यतः स्वः समीहसे ॥ २१ ॥ यतो यतः समीहसे ॥ यतो यतः स
मीहसे ततो नोऽभयं कुरु ॥ शन्नः कुरु प्रजाभ्योऽभयन्नः
पशुभ्यः ॥ २२ ॥ सुमित्रिया नः ॥ सुमित्रिया न आप ओषधयः

ष॰ ५५ सन्तु दुर्म्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वय
न्द्विष्मः ॥ २४ ॥ तच्चक्षुः ॥ तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्रमु
च्चरत् ॥ पश्येम शरदः शतञ्जीवेम शरदः शतꣳ शृणुयाम
शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः
शतम्भूयश्च शरदः शतात् ॥ २५ ॥ इति रुद्रजाप्ये अष्टमो
ऽध्यायः समाप्तः ॥ ८ ॥ श्रीरस्तु ॥

55

कठी यजुर्वेदी

नं० ८ [illegible]